Vol. VIII - Issue II (July- 2021)
ISSN - 2277-7067

राष्ट्रहिताय संस्कृतम्

Kavikulaguru Kalidas Sanskrit University
Ramtek, Dist. Nagpur, Maharashtra

Peer Reviewed

Journal of Fundamental & Comparative Research

UGC CARE Listed Journal

शोधसंहिता

New Research Frontiers

July 2021 Volume - VIII Issue II

Research Journal
ISSN No. 2277-7067

Journal of Fundamental & Comparative Research

शोधसंहिता

A Peer Reviewed Bi-annual Interdisciplinary Research Journal of the University

UGC CARE Listed Journal
New Research Frontiers

- Patron -
Prof. Shrinivasa Varkhedi
Vice Chancellor

- Chief Editor -
Prof. Madhusudan Penna
Director, Research & Publication

- Editor -
Dr. Rajendra C. Jain
Dept. of Sanskrit Language & Literature

राष्ट्रहिताय संस्कृतम्

KAVIKULAGURU KALIDAS SANSKRIT UNIVERSITY
RAMTEK

A Bi-annual Interdisciplinary Research Journal of KKSU
Peer Reviewed Journal of Fundamental & Comparative Research

शोधसंहिता

Volume VIII Issue II (July - 2021) ISSN No. 2277-7067
UGC CARE Listed Journal

Patron : **Prof. Shrinivasa Varkhedi**
Hon'ble Vice Chancellor

Chief Editor : **Prof. Madhusudan Penna**
Director, Research & Publication, KKSU

Editor : **Dr. Rajendra C. Jain**
Dept. of Sanskrit Language & Literature

Co-Editor : **Dr. Deepak Kapade,** Librarian (I/c)
Dr. Renuka Bokare, PRO, KKSU

Editorial Board :
- Prof. Nanda J. Puri
- Prof. Lalita Chandratre
- Prof. Krishnakumar Pandey
- Prof. Vijaykumar C. G.
- Prof. Kavita Holey

Peer Review Committee :
Dr. Leena Rastogi, Nagpur
Dr. V. Subrahmanyam, Hyderabad
Dr. Dinesh Rasal, Pune
Dr. Upendra Bhargav, Ujjain
Dr. Archana Aloni, Nagpur
Dr. Dinkar Marathe, Ratnagiri

Published by : **Registrar,** KKSU, Ramtek
© KKSU, Ramtek

राष्ट्रहिताय संस्कृतम्

KAVIKULAGURU KALIDAS SANSKRIT UNIVERSITY
RAMTEK

संपादकीयम्

संस्कृत-तदितरभाषाविषयकं शास्त्रविषयकञ्च संशोधनं विदधतां विपश्चिद्वराणां संशोधने कृतप्रवेशानाञ्च संशोधकानां पुरतः शोधसंहिताया नवीनमिममङ्कं समर्पयतो मे महानन्दो भवति। साम्प्रतिकं संशोधनक्षेत्रमतीव प्रभावि सत् नवीनविषयाणां संशोधनस्य माहात्म्यमभिव्यनक्ति। संशोधनेन खलु कस्यापि क्षेत्रस्य माहात्म्येन सह सामाजिकी उपयोगिता च प्रतिपादिता भवति। अत एव शोधसंहिताया माध्यमेन नवीनम् उपयुक्तञ्च संशोधनं वयं प्रकाशयितुं सर्वदा उद्युक्ता इति न तिरोहितं भवताम् ।

शास्त्रक्षेत्रे प्राचीनपद्धत्या वाद-प्रतिवाद-खण्डन-मण्डन-क्रोडपत्रादि द्वारा पर्याप्त-मध्ययनं विहितमेव। एतावति काले प्राचीनशास्त्राणां संरक्षणदिशि विहितः प्रयत्नो नो मनांसि प्रमोदयति। परं परिणममानेन सह कालेन समाजोऽपि परिवर्तत इति विद्मो वयम्। अतः सर्वथा साम्प्रतिक-समाजस्य आवश्यकताः मनसि निधाय, समस्याश्च सम्यगाकलय्य संशोधनं विधेयमिति मे भावना।

तथैव वैदिकगणिते, योगे दर्शनशास्त्रे च विश्वस्तरे जायमानानां परिवर्तनानामाधारेण संशोधनमावश्यकम्, एतेन शास्त्रविज्ञानं विकसितं भूत्वा व्यक्तिविकासः समाजविकासश्च अवश्यं भवेदित्येव मे दृढविश्वासः । संशोधनं सर्वमपि मानवहितमेव लक्ष्यीकृत्य प्रवर्तताम्।

अस्मिन्नङ्के प्रकाशिता लेखाः भिन्नविषयकाः। सर्वथा विश्वविद्यालयेन प्रकाशितेयं शोधसंहिता संस्कृतजगति प्रवृत्तस्य संशोधनस्य स्वरूपं महत्त्वञ्च अभिव्यनक्तीति वक्तुं शक्यते। नवीनसंशोधका प्राप्तप्रेरणा अग्रे अस्यां दिशि प्रवर्तन्तामिति शुभकामना मे।

कुलगुरुः

Index

अक्र.	शोधपत्र नाम	शोधकर्तृनाम	पृ.क्र
01	कालिदास-काव्येषु वर्णितानामतिप्राकृतिक-तत्त्वानां परवर्तिकाव्येषु प्रभाव:	सौ.निशा रामेश्वर चौधरी प्रा.नन्दा पुरी	01-08
02	प्रभुवंशकाव्यस्य सांस्कृतिकदृष्ट्या अध्ययनम्	सौ.सरिता रा. गिल्लूरकरः डॉ.राजेंद्र चिं. जैनः	09-17
03	समश्लोकीगुरुचरित्रग्रन्थानुसारं कर्माचरणम्	सौरभ जोशी डॉ.जयवन्त चौधरी	18-23
04	शरद्रात्रिव्याख्यायां करणकारकसूत्राणां समीक्षणम्	कविता जोशी डॉ.शिवरामभट्टः	24-27
05	बहुवचने झल्येदिति सूत्रार्थविमर्श:	डॉ.शिवरामभट्टः	28-33
06	शुक्रनीतीची कर्मचारी प्रशासनाच्या अध्ययनासाठी उपयुक्तता	कु.वैष्णवी जगन्नाथ पाटील प्रा.पराग जोशी	34-44
07	गुलाबगीतेनुसार दुःखाचे कारण व दुःखमुक्तीचे साधन : विश्लेषणात्मक अध्ययन	राजेंद्र धा. मेश्राम प्रा.कविता होले	45-53
08	मनोव्यवस्थापन से जीवन व्यवस्थापन (शिवसंकल्पसूक्त के प्रकाश में)	उन्मेष बोहटे प्रा.हरेकृष्ण अगस्ती	54-59
09	प्राचीन श्रीकल्याणेश्वर मन्दिर(नागपुर) वास्तु-एक अध्ययन	प्रणव मुळे प्रा.कृष्णकुमार पाण्डेय	60-65
10	ज्योतिषशास्त्रोक्त-नेत्ररोगविचार	अनुज शर्मा प्रा.प्रसाद गोखले	66-69
11	जैमिनिसूत्र में पद तथा कारकांश से आर्थिक -स्थिति का समीक्षण	अंबालिका सेठिया डॉ.दिनकर मराठे	70-78
12	हठतत्त्वकौमुदी में स्थित अष्टकर्मों का अध्ययन	भालचंद्र दिलीप नेरपगार प्रा.मधुसूदन पेन्ना	79-86

13	Social and Emotional Wellbeing through Creative Intelligence as Found in Medha Sukta	Sunita Wadhavan Prof.Madhusudan Penna	87-101
14	Best Practices in Teacher Education	Resmi Umesh U. Dr.Hrishikesh Dalai	102-108
15	A Study of the Challenges and Problems by Implementation of ICT in Teaching among Senior Secondary School Teachers	Priyanka Kewalramani Dr.Rajshree Meshram	109-121
16	Dīkṣā, Dīkṣiṭru, Didīkṣu- A Peep into the Samaya Method of Worship (Specific Focus on the Initiation, Initiator and Desirous Initiate Factors)	Dr. Iyer Sridhar V	122-138
17	Validating Ancient Way of Rainfall Prediction with the IMD Gridded Rainfall using Computational Methods over Indian Region	Bondu Chandra Shekharam	139-148

कालिदास-काव्येषु वर्णितानामतिप्राकृतिकतत्त्वानां परवर्तिकाव्येषु प्रभाव:

सौ.निशा रामेश्वर चौधरी
प्रा. नन्दा पुरी

प्रस्तावना

भारतीयसाहित्ये संस्कृतवाङ्मयस्याभूतपूर्वयोगदानम् अस्ति। जीवनस्य प्रत्येकावस्था संस्कृतकाव्यवाङ्मयेन प्रकाशिता भवति। **'यन्न पश्यति रवि: तद् पश्यति कवि:'** इति सूक्त्यनुसारेण ऐहिकजगद्अतिक्रामिणी दर्शनविचारकरणयो: शक्ति: कवीनां पार्श्वे भवति। व्यास-भास-कालिदास-माघ-भारवि-बाणभट्टादिभिः कविभि: स्वकल्पनाशक्त्या वाङ्मयजगति अनेकाद्भुता-लौकिकप्रसङ्गा: पूरिता:। मानवीय-जीवनं तु प्रकृते: नियमेषु बद्धम् अस्ति किन्तु कवय: स्वस्य कल्पनाविलासेन प्रतिभाशक्तिद्वारा अलौकिकाद्भुतजगति विचरन्ति। यथोच्यते काव्यप्रकाशे-

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति॥[1]

नियतिनियमै: या बद्धा नास्ति, आनन्दमयी, नवरसै: युक्ता एतादृशी काव्यसृष्टि: कवे: वाणी विजयीभवति। यथा- कवे: सृष्ट्यां गौ: अपि वक्तुं शक्नोतीति नियतिनियमरहिता कवेः वाणी भवति।

अतिप्राकृतिकतत्त्वम्-

काव्यस्यात्मा रसो भवति। रसं विना काव्यस्य परिपूर्ति: नास्ति।[2] अत: उपर्युक्तः गोप्रसङ्ग: अद्भुतरसस्य परिपोषं करोति। एतेन काव्यं प्रभावशालि कर्तुम् अतिप्राकृतिकतत्त्वस्य प्रयोग: भवति। दिक्कालयो: नियमनेन विरहिताः एतादृश्य: कल्पना: येषु आगच्छन्ति तानि तत्त्वानि अतिप्राकृतिकतत्त्वानि कथ्यन्ते।

अतिप्राकृतिकतत्त्वम् आङ्ग्लभाषायां 'Supernatural Element' कथ्यते। अस्या: सङ्कल्पनाया: उद्गम: मध्ययुगीन-लॅटिनसाहित्ये (Medieval Latin) ख्रिस्ताब्देषु

1 का.प्र. १.१.२

2 वाक्यं रसात्मकं काव्यम्। (सा.द.)

१५२० त: १५३० यावत् जात:। लँटिनमध्ये अयं शब्द: 'Supernaturalis' अस्ति। यस्मिन् Supra शब्दस्य above इति अर्थोऽस्ति एवञ्च naturalis शब्दस्य natural इति अर्थोऽस्ति। एतेन लोकाद् प्रकृते: र्वा परे एकाद्भुता सृष्टि: अतिप्राकृतिकसृष्टि: कथ्यते। यथा उक्तमपि-

A Supernatural element is something that is not real but by they are pretended to be scary -e.g. Ghost, Witch etc.[3]

Incapable to be explained by science or the laws of nature, characteristic or relating to ghosts, goals or other supernatural beings or to appear beyond nature.[4]

प्राचीनग्रीकशोकान्तिकासु उपवर्णिताः देव्य: मुख्यरूपेण मानवानां साहाय्यं कुर्वत्य: दृश्यन्ते। पुरुरवा-उर्वशी एतादृशसंवादसूक्ते इयम् उर्वशी अतिमानुषी **अप्सरा**[5] अस्ति। अतिमानुषउर्वश्या: सामान्यमनुजेन सह प्रीति: कालिदासेन अतिप्राकृतिकतत्त्वानाम् उपयोगं कृत्वा नितान्तरमणीया कृता।

विज्ञानं शास्त्रं वा यद् कथयितुं न शक्नोति एतादृश्य: घटना: अतिप्राकृतिकतत्त्वेषु आगच्छन्ति। वैदिकसाहित्ये पुरुरवा-उर्वशी संवादसूक्तम्, विश्वामित्र-नदी संवादसूक्तम्, सरमा-पणि संवादसूक्तम्, पुरुषसूक्तमित्यादिषु अतिप्राकृतिकतत्त्वानां बीजं द्रष्टुं शक्यते।

यदासु मर्तो अमृतासु निस्पृकसं क्षोणिभि: क्रतुभिर्न पृंक्ते।
त आतयो न तन्व: शुम्भत स्वा अश्वासो न क्रीळयो दन्दशाना:॥[6]

मनुष्ययोनिं प्राप्तः पुरुरवा यदा दिव्यलोकवासिन्यः अप्सरा: प्रति गच्छति तदा ता: अप्सरा: अश्वारिव पलायिता:। प्रस्तुतवर्णनै: अस्य कथनस्य सम्भावना वर्धिता अस्ति यत् अतिमानुषवातावरणम्, आधिदैविकता, अद्भुतसृष्टे: निर्मितिं कृत्वा कथानकम् अधिक-प्रभावीकर्तुं कवे: मनसि अस्ति।

Metaphysical (निसर्गात् परे) Paranormal (असामान्य:) Preternatural (अलौकिकम्) Superhuman (अतिमानुष:) एतादृशानां तत्त्वानां विचार: अतिप्राकृतिक-तत्त्वेषु प्रायेण भवति।

---

3 English Wiktionary .com

4 Wikipedia.com

5 संस्कृत साहित्य में नीतिकथा का उद्गम एवं विकास,प्रभाकर कवठेकर, पृष्ठ क्र.७५

6 ऋ.सं., पृष्ठ क्र.२३४

१. स्वर्गलोक-पाताललोक-सर्पलोक-नरकलोकसदृशानि स्थानानि मानवाय अगम्यानि सन्ति।
२. इन्द्रादि देव-पिशाच-असुर-विद्याधर-गन्धर्व-ब्रह्मदेव-अप्सरादीनि अतिमानुषपात्राणि।
३. आकाशगमनम्, अन्तर्धानीभवनम्, प्रकटीभवनम्, इतीदृश्य: शक्तय:।
४. अचेतनप्राकृतिकपदार्थेषु मानवारोपणम्।
५. चेतनप्राणिनां मानवीवकरणम्।
६. शापवरदानयो: प्रसङ्गा:।

इत्यादिभिः बिन्दुभि: अतिप्राकृतिकतत्त्वानां रूपरेखां द्रष्टुं शक्यते।

अतिप्राकृतिकतत्त्वानां काव्यप्रयोजनम्

मम्मटाचार्येण काव्यप्रकाशे काव्यप्रयोजनमुक्तमस्ति यद् तस्मिन् काव्यप्रयोजने **सद्य: परनिर्वृतये**[7] इत्येकं काव्यप्रयोजनमस्ति। अत: रसानुभूते: कृते एतादृशं प्रयोजनं साधयितुं रोचकप्रसङ्गानामावश्यकताऽस्ति। रूपकात्मककथायै अद्भुतवर्णनाय च कवय: अतिप्राकृतिक तत्त्वानां प्रयोगं कुर्वन्ति।

अतिप्राकृतिकतत्त्वानां काव्येषु उद्दिष्टानि

१. रसपरिपोषाय (विशेषत्वेन अद्भुतरस:)
२. मनोरञ्जनाय
३. उपदेशाय
४. आकर्षककथानकाय

उपरिप्रदत्तउद्दिष्टानां पूर्तीकरणाय काव्येषु अतिप्राकृतिकतत्त्वानां प्रयोग: भवति।

कालिदासस्य काव्यानि साहित्यिकविविधतया अलङ्कृतानि सन्ति। प्राकृतिकातिप्राकृतिक-मानवीयामानवीय-भौतिकाध्यात्मिक-लौकिकालौकिक-दिव्यादिव्य- वास्तविक-काल्पनिका-दया: विषया: दृष्टिगोचरीभवन्ति। कालिदासेन वर्णितानाम् अतिप्राकृतिकतत्त्वानां प्रभाव: माघ:, श्रीहर्ष:, बाणभट्ट:, भवभूति: इत्यादिषु कविषु दृश्यते। अधोलिखितानां बिन्दूनाम् आधारेण प्रस्तुतविषयस्य विवरणं क्रियते।

---

7 काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्य: परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।। का.प्र.१.२

१. नदीनां मानवीकरणम्-

प्राकृतिकचेतनं वा अचेतनं पदार्थेषु मानवीकरणं कृत्वा ते पदार्था: अतिप्राकृतिकस्वरूपं प्राप्नुवन्ति। नदी प्राकृतिकाचेतनतत्त्वम् अस्ति अत: नदीनां मानवेव व्यापार: अतिप्राकृतिकतत्त्वानां भाग: भवति। कालिदासेन कुमारसम्भवे एकादशसर्गे गङ्गा-नद्या: मानवीकरणं कृतम्।

अभ्यर्थ्यमाना विबुधै: समग्रै: प्रह्वै: सुरेन्द्रप्रमुखैरुपेत्य।
तं पाययामास सुधातिपूर्णं सुरापगा स्वं स्तनमाशु मूर्ता॥[8]

इन्द्रादिदेवानां प्रार्थनया गङ्गा नदी न केवलं नार्या: रूपं धृत्वा तत्क्षणं तत्र उपस्थिता अभवत् अपितु तं बालकं स्वस्य अमृतमयं दुग्धं पाययति स्म।

भवभूतिना उत्तररामचरितम् इति नाटके तमसा मुरला च नद्यो: पात्रयो: शुद्ध-विष्कम्भकं तृतीये अङ्के योजितम्।

उत्तररामचरिते अस्मिन् नाटके तृतीये अङ्के नद्यो: संवाद:-

"(तत: प्रविशति नदीद्वयम्)

एका- सखि मुरले! किमसि सम्भ्रन्तेव?

मुरला- सखि तमसे! प्रेषितास्मि भगवतोऽगस्त्यस्य पत्न्या लोपामुद्रया सरिद्वरां गोदावरीमभिधातुम्"[9]

कालिदास: भवभूति: इत्यनयो: काव्ये यद्यपि वर्णनशैलीकाव्यप्रकारप्रसङ्गेषु भिन्नता अस्ति तथापि नदीनां मानवीकरणम् इति सङ्कल्पनायां द्वयो: साम्यं दृश्यते इति इत्यत्र नास्ति संदेहः।

२. सदेहगगनगमनम्-

अभिज्ञानशाकुन्तलम् इति नाटके पञ्चमे अङ्के पुरोहित: राजानम् एकाद्भुतां घटनाम् अकथयत्।

पुरोहित:- सा निन्दन्ती स्वानि भाग्यानि बाला बाहूत्क्षेपं क्रन्दितञ्च प्रवृत्ता।
स्त्रीसंस्थानञ्चाप्सरस्तीर्थमारादुत्क्षिप्याङ्के ज्योतिरेकं जगाम॥[10]

8 कुमारसंभवम्-११.१

9 उत्तररामचरितम्, ३.१३४

अप्सरस्तीर्थस्य समीपे स्त्रीसदृशी एका ज्योति: विद्युलतेव चकाशे तथा सा उत्थाय अन्तर्धाना जाता। ईदृशं दिव्याकृते: प्रकटवर्णनं बाणभट्टेनापि कादम्बर्यां कृतम् अस्ति।

'महाप्राण: पुरुषो महापुरुषोलक्षणोपेत:, दिव्याकृति:, स्वच्छ-वारिधवलेन देहप्रभावितातेन क्षालयन्निव दिगन्तराणि, आमोदिना च शरीरत: क्षरता शिशिरेण शीतज्वरमिव जनयता, अमृतशीकर्षेण तुषारपटलेनेवानुलिम्पन् गोशीर्श-चन्दनरस्च्छटाभिरिवासिंचन ऐरावतकरपीवराभ्यां बाहुभ्यां मृणालधवलाङ्गुलिभ्यों शीतलस्पर्शाभ्यां तमुपरतमुत्क्षिपन्, दुन्दुभिगम्भीरेण स्वरेण "वत्से, महाश्वेते! न त्याज्यास्त्वया प्राणा: पुनरपि तवानेन सह भविष्यति समागम" इत्येव पितेवाभिधाय सहैवानेन गगनतलमुदपतत्'।[11]

पुण्डरीकदेहस्य गगननमनप्रसङ्गे पुण्डरीक: मृत: जात:। पुण्डरीकस्य मृत्यो: दु:खिता महाश्वेता आत्मदाहाय प्रवृत्ता तदा दिव्या वाणी ताम् अस्मात् अवरुणद्धि स्म, अवदत् च - पुण्डरीकेन सह भवत्या: पुनर्मेलनं भविष्यति इति। अस्मिन् प्रसङ्गे एका दिव्याकृति: पुण्डरीकस्य देहम् अवकाशे नयति इति वर्णनम् अस्ति। किञ्च, कालिदास: बाणभट्ट: चेत्यनयो: काव्ये सदेहगगनगमनस्य प्रसङ्गस्य साम्यं दृश्यते इति समीक्षितो विषयः।

३.पशुषु मानवारोपणम्-

मानववत् पशूनां भाषणं तेषां व्यवहार: च पशुषु मानवारोपणम् इति कथ्यते। कलिदासेन मायावी सिंह: नन्दिनी धेनु: इत्यनयो: प्रसङ्ग: रघुवंशे चित्रित:। अस्मिन् प्रसङ्गे सिंहधेन्वो: मनुष्यवत् सम्भाषणस्य आरोपणं कृतम्।

तमार्यगृह्यं निगृहीतधेनुर्मनुष्यवाचा मनुवंशकेतुम्।
विस्मायथन्विस्मितमात्मवृत्तौ सिंहोरुसत्वं निजगाद सिंह:॥[12]

तथैव- **तं विस्मितं धेनुरुवाच साधो मायामयोद्भाव्यपरीक्षितोऽसि**[13]

ईदृशानां प्राणिनां मनुष्यवाण्या सम्भाषणं कालिदासेन कृतम् अस्ति। श्रीहर्षेणापि नैषधीयचरितम् इति महाकाव्ये तृतीयसर्गे हंसे मनुष्यवाचा भाषणस्य आरोपणं कृतम् अस्ति।

---

10 अभिज्ञानशाकुन्तलम् ५.३३

11 कादम्बरी, पृष्ठ क्र.५१५

12 रघुवंशम् २.३३

13 रघुवंशम् २.३

रुषा निषिद्धाऽऽलिजनां यदैनां छायाद्वितीयां कलयाञ्चकार।
तदा श्रमाऽम्भ:कणभूषिताङ्गी स कीरवन्मानुषवागवादीत्॥[14]

अत्र दूतरूपेण आगत: हंस: मनुष्यवत् दमयन्त्या सह भाषते स्म। कालिदास: श्रीहर्ष: इत्यनयो: द्वयो: काव्ये पशूनां मानवारोपणं दृश्यते। अस्मिन् विषये श्रीहर्ष: कालिदासेन प्रभावितोऽस्ति ज्ञातव्यो विषयः।

४. तिरस्करिणी-विद्याया: प्रयोग:-

अभिज्ञानशाकुन्तलम् इति नाटकस्य षष्ठे अङ्के अप्सरस: सानुमत्या: वर्णनं कालिदासेन कृतम् अस्ति। आकाशमार्गेण आगता इयम् अप्सरा दुष्यन्तस्य अवस्थां द्रष्टुं तस्य समीपे तिरस्करिणी-विद्यया अदृश्यरूपेण स्थिता।

"अस्ति मे विभव: प्रणिधानेन सर्वं परिज्ञातुं
किन्तु सख्या आदरो मया मानयितव्य: भवतु
अनयोरेवोद्यानपालिकयोस्तिरस्करिणीप्रतिच्छन्ना
प्पार्श्ववर्तिनी भूत्वोपलप्स्ये[15]

तिरस्करिणी-विद्यया सिद्धव्यक्ति: मन्त्रं पठित्वा अदृश्य: भवितुं शक्नोति। सानुमत्यापि एतस्या विद्याया: प्रयोगं कृत्वा गुप्तरूपेण दुष्यन्तस्य विरहावस्थां द्रष्टुं प्रयत्नरता भवति। भवभूतिनापि ईदृश: प्रसङ्ग: उत्तररामचरिते तृतीये अङ्के चित्रित:। तमसा मुरला इत्यनयो: नद्यो: संवादात् अदृश्या सीता तत्र सञ्चरति इति निम्नरीत्या ज्ञायते।

तमसा- उक्तमेव भगवत्या भागीरथ्या-
न त्वामवनिपृष्ठवर्तिनीमस्मत्प्रभावाद्वनदेवता
अपि द्रक्ष्यन्ति किमुत मर्त्या:?[16]

भागीरथ्या: प्रभावेन कोऽपि सीतां भूतले द्रष्टुं न शक्नोति इति वर्णनं भवभूतिना कृतम्। अत: कालिदासेन वर्णिता 'तिरस्करिणी-विद्या' इति प्रसङ्गस्य प्रभाव: भवभूते: काव्ये अपि दृश्यते इति वक्तुं शक्यते।

---

[14] नैषधीयचरितम् ३-१२

[15] अभिज्ञानशाकुन्तलम्, पृष्ठ क्र.२९२

[16] उत्तररामचरितम्, पृष्ठ क्र.१४१

उपसंहार:

रामायणं महाभारतम् चेत्यनयो: काव्ययो: अनन्तरं कालिदासात् लौकिकमहाकाव्यस्य परम्परा प्रारब्धा। पुराणसाहित्यं काव्यस्य आधारभूतम् इति मत्वा न केवलं कालिदासेन अपितु कालिदासात् परं ये कवय: जाताः तै: अपि अतिप्राकृतिकतत्त्वानां वर्णनं कृतम्। तेषु कविषु बाणभट्ट: श्रीहर्ष: भवभूति: इत्यादय: कवय: प्रभाविता: सन्ति। एतेषां कवीनां काव्यानाम् अध्ययनं कृत्वा अधोलिखिता: निष्कर्षा: दृश्यन्ते।

१. प्राकृतिक-अचेतन-पदार्थानां मानवीकरणस्य विषये कालिदास्यस्य कुमारसम्भव-महाकाव्यस्य प्रभाव: उत्तररामचरितम् इति नाटके दृश्यते।

२. प्राकृतिक-चेतन-पदार्थानां मानवारोपणस्य विषये कालिदास्यस्य रघुवंश-महाकाव्यस्य प्रभाव: नैषधीयचरितम् इति महाकाव्ये दृश्यते।

३. सदेहगगनगमनम् इति विषये अभिज्ञानशाकुन्तलम् इति नाटकस्य प्रभाव: बाणभट्टस्य कादम्बर्यां पुण्डरीकदेहस्य गगनगमनप्रसङ्गे अस्तीति ज्ञायते।

४. तिरस्करिणी-विद्याया: प्रयोग: कालिदासवत् भवभूतिनापि उत्तररामचरिते कृत: इति ज्ञातं भवति।

□□□

सन्दर्भग्रन्थसूचिः-

1. अभिज्ञानशाकुन्तलम्,श्रीकृष्णमणित्रिपाठी, चौखम्बाप्रकाशनम्, वाराणसी
2. उत्तररामचरितम्,डॉ.रमाकान्त त्रिपाठी, चौखम्बाप्रकाशनम्, वाराणसी
3. ऋग्वेदीयसंवादसूक्त,डॉ.सत्यदेव चौधरी,अलंकार प्रकाशनम्, नवी दिल्ली
4. कालिदास और शेक्सपिअर के काव्यो में सौंदर्य और प्रेमतत्त्व, डॉ.राम कुमार वर्मा, संपादन- डॉ.कृष्णगोपाल मिश्र, हंसा प्रकाशनम्, जयपुरम्
5. कादंबरी,आचार्या रेग्मी, चौखम्बा प्रकाशनम्, वाराणसी
6. काव्यप्रकाश, डॉ. सत्यव्रत सिंह, चौखम्बा प्रकाशनम्, वाराणसी
7. कुमारसम्भवम्, पं.प्रद्युम्न पाण्डेय, चौखम्बा प्रकाशनम्, वाराणसी
8. नैषधीयचरितम्, मोहनदेव पन्त, मोतीलाल बनारसीदास प्रकाशनम् , वाराणसी
9. रघुवंशम्, श्रीकृष्णमणि त्रिपाठी, चौखम्बा प्रकाशनम्, वाराणसी
10. संस्कृत साहित्य में नीतिकथा का उद्गम एवं विकास, प्रभाकर कवठेकर, चौखम्बा प्रकाशनम्, वाराणसी
11. A Background to the study of English Literature, B.Prasad, Macmillan Publication, Revised Edition, 2000
12. A History of English Literature-vol 1&2 W.R.Goodman, Doaba House Publication, Delhi, Reprinted-2000

प्रभुवंशकाव्यस्य सांस्कृतिकदृष्ट्या अध्ययनम्

सौ. सरिता रा. गिल्लूरकरः
डॉ राजेंद्र चिं. जैनः

भारतीयसाहित्यं साहित्यजगति प्रसिद्धम्। समग्रमपि भारतीयसाहित्यम् उत्कीर्णलेखैः, हस्तलिखितैः, प्राचीनविविधशास्त्रीयमूलग्रन्थैः, तदाश्रितटीकाग्रन्थैः, भाष्योप-भाष्यैः च भारते नितरां समृद्धिं भजते।

उपलब्धभारतीयवाङ्मये उत्कीर्णसाहित्यं हस्तलिखितसाहित्यं च पुराकालादेव विविधासु, प्राक्तनभारतीयलिपिषु उपलभ्यते। अद्य हस्तलिखितसाहित्यं ब्राह्मी, खरोष्ठी, शारदा, सेमेटिक, मोडी, देवनागरी, सकळादिलिपिषु उपलभ्यते। एतेन न केवलं लिपिलेखनं, अपितु भारतीयसंस्कृतेः उपस्थापनं भवति तथाच तत्प्राक्तनभारतीयसंस्कृतेरपि उट्टङ्कणम् उपलब्ध-उत्कीर्णलेखसाहित्येन हस्तलिखितसाहित्येन च अद्य भवति। एतद्व्याजेन हस्तलिखितानां माध्यमेन संशोधनं कर्तुं, शोधपत्रञ्च लिखितुं मया चिन्तितम्। अत्र अस्मिन् शोधपत्रे 'प्रभुवंश' इति काव्यविषयकस्य हस्तलिखितस्य आधारेण भारतीयेतिहासस्य संस्कृतेश्च योगदानादिकम् अत्र मया विवेच्यते। भारतदेशे विविधाः परम्पराः पुरातनकालादेव अवर्तन्त। महाराष्ट्रप्रदेशः तासु राजपरम्परासु अग्रगण्य इत्यत्र नास्ति कस्य अपि सन्देहः।

महाराष्ट्रस्य मराठाराजपरम्परा पुरातनकालात् समग्रेपि भारते व्याप्ता अस्ति। पराक्रमिणः शिवाजीमहाराजस्य राष्ट्रस्य महाराष्ट्रस्य च कृते योगदानमेव अत्र प्रमाणम्। एवञ्च महाराजमाश्रित्य एतावति काले अधोलिखितं किंचित् साहित्यं पश्चाद्वर्तिभिः लिखितम्। तद्यथा-

१) शिवकाव्यम्।
२) देवदेवेश्वरमहाकाव्यम्।
३) बाजिरावमस्तानीति।

शिवाजिमहाराजस्य पश्चाद्वर्ति 'पेशवा' इति उपनामधारिणः सवाई माधवरावस्य विषयकं काव्यरूपं हस्तलिखितम् उपलभ्यते। तद्विषयकम् इदं प्रस्तुतं शोधपत्रम् प्रस्तूयते।

प्रभुवंशहस्तलिखितम्

काव्यस्य नाम प्रभुवंशकाव्यम्। तद् यथा - "भूपस्य प्रभोः अन्ववायः वंशः प्रभुवंशाभिधो ग्रन्थ इत्यर्थः। हस्तलिखितरूपस्य विषयः शिवाजीराजोत्तर'पेशवेवंशस्य राजपरम्पराः शौर्यगाथावर्णनं वर्तते। अस्य तिस्र: प्रतय: उपलब्धा: सन्ति। तद् यथा

१) प्रभुवंशकाव्यम्।[1]

२) प्रभुवंशम्[2]

३) प्रभुवंशकाव्यम्[3]

हस्तलिखितस्य स्थूलस्वरूपम् -

प्रथमप्रतिपत्रस्य प्रभुवंशकाव्यस्य वर्णनम्- अस्मिन् हस्तलिखिते द्वात्रिंशत् सङ्ख्याकानि पत्राणि सन्ति। पृष्ठक्रमांकाः पृष्ठस्य एकस्मिन् पृष्ठभागे एव वर्तन्ते। एतत् हस्तलिखितं सम्पूर्णं लभ्यते। अत्र आहत्य ११५ श्लोकाः सन्ति। प्रत्येकं पृष्ठे एकः श्लोकः श्लोकद्वयं वा लभ्यते। श्लोकानाम् चरणसङ्ख्या निश्चिता नास्ति। कुत्रचित् चरणद्वयं कुत्रचित् चरणत्रयं कुत्रचित् चरणचतुष्टयं तथाच अधिकाधिकं षट्चरणानि अपि लभ्यन्ते। द्वात्रिंशे श्लोके पुरातना पङ्क्तिः सम्मार्जिता तथाच नूतना पङ्क्तिः पुनर्लिखिता दृश्यते। सर्वत्र श्लोकानां क्रमसङ्ख्या दृश्यते। श्लोकाः क्रमेण लिखिता: सन्ति । तत्तत्-श्लोकानां तत्तट्टीकानां च परिसमाप्तिः तत्तत्पृष्ठे एव कृता दृश्यते। कुत्रचित् स्थानाभावे अन्तिमपङ्क्तिः पृष्ठस्य दक्षिणवामतश्च लिखिता।

हस्तलिखितपत्राणां वर्णः पीतः अस्ति। आयामश्च २५ १/२से.मी. X ११ १/२से.मी. अस्ति। हस्तलिखितस्य भाषा संस्कृतं, लिपिश्च देवनागरी अस्ति। हस्तलिखितं सुवाच्ये सुन्दरे च वर्णे लिखितमिति कृत्वा वाचनाय सर्वेषां सुकरम् अस्ति। श्लोकाः वृत्तबद्धाः सन्ति। श्लोकेषु वसन्ततिलका, स्रग्धरा, शार्दूलविक्रीडितम्, आर्या, इन्द्रवज्रा, उपेन्द्रवज्रा, उपजातिः, शिखरिणी, मत्तमयूरी, पञ्चचामरं, भुजङ्गप्रयातम् इत्यादीनि वृत्तानि सन्ति। टीकाभागः अस्ति तथाच व्याख्या गद्यरूपेण लिखिता अस्ति। यत्र यत्र त्रुटितम्, तत्र हस्तलेखनकारः मार्जनस्य कृतेऽपीतवर्णस्य प्रयोगं कृतवान् अस्ति।

---

1. द.क्र.३१,६८४, आनन्दाश्रमसंस्था पुण्यपत्तनतः।

2 . द.क्र.२१९५ (सर्ग२) मुंबई विद्यापीठतः

3. अ ९३२-१२/६/५१, दि.स.४१

हस्तलिखितस्य आन्तरिकं स्वरूपम् :-

प्रभुवंशमिति हस्तलिखितस्य शीर्षकम् अस्ति। शीर्षकस्य उल्लेखः ग्रन्थारम्भे समाप्तिभागे च अस्ति। आरम्भे यथा-"अथ प्रभुवंशकाव्यप्रारम्भः। अन्ते च यथा- पुष्पिकायां - इति श्रीः गोविन्दपण्डितविरचितं प्रभुवंशकाव्यं समाप्तम् इति"। एतेन काव्यमिदं पेशवेवंशीयस्य सवाई-माधवराव पेशवे इति शासकस्य आधारेण रचितम् इति साधितं भवति। पुष्पिकायाम् उल्लिखितेन काव्यस्य अस्य रचयिता गोविन्दपण्डितः अस्ति इति ज्ञायते। काव्यरचयितुः जन्मस्थल-काल-वंशादिविषयकमन्यद् किमपि प्रामाणिकं तथ्यं नोपलभ्यते।[4]

काव्यरचयितुः गोविन्दपण्डितस्य गुरुः शङ्कराचार्यपरम्परानुवर्तकः सच्चिदानन्दनामा कश्चन आसीत् तस्य एव निर्देशेन काव्यं इदम् सम्पन्नम् इति काव्यान्ते गोविन्दपण्डितः लिखति।[5] मुम्बईतः प्राप्तहस्तलिखिताश्रयेण गोविन्दपण्डित एव प्रभुवंशकाव्यस्य रचयिता इति तत्र लिखितपद्यबन्धेन ज्ञायते।[6] तद् यथा- "पद्यपद्मैः सुशोभिते प्रभुवंशमये सरसि, मानवस्य कृपया गोविन्दरूपः सारसः अरमत्।" इत्येवं माधवरावस्य प्रसादेन गोविन्दपण्डितः काव्य-मरचयत् इत्येवं रूपेण काव्य-रचयितुः विषये तथ्यं ज्ञातम्।

प्रभुवंशकाव्यग्रन्थस्य आश्रयेण लिखिता व्याख्या **अनन्त** इति कविना कृता इति ग्रन्थारम्भे प्राप्तोल्लेखेन ज्ञायते। व्याख्येयं बोधिनी इत्याख्या बोधगम्या सरला च जडमतीनां ज्ञानवर्धनाय सन्तिष्ठते। व्याख्यायां विषमपदानि एव व्याख्यातानि दृश्यन्ते। यथोक्तम्-

"श्री गणेशमानम्य बालानां बोधसिद्धये अनन्तः कुरुते व्याख्यां प्रभुवंशस्य बोधिनी।[7] इति"

काव्यस्य अस्य रचना माधवरावस्य प्रसादेन जातेति काव्यान्ते उल्लिखितेन ज्ञायते। माधवरावस्य जन्म शालिवाहन शक१६९६ इति इतिहासग्रन्थेषु उल्लिखितम्। तदाश्रयेण काव्यस्यास्य कालः तथाच, व्याख्याकालः विक्रमसंवत्सरअष्टादशशतकं स्यादिति ज्ञायते।

---

[4] डॉ. टी.जी.माईनकर-शोधपत।रम् एवं डॉ.उषा रानडे-शोधपत्रम्

[5] श्री शङ्कराचार्य पदाधिरुढः श्री सच्चिदानंद गुरोनिर्देशात गोविन्द सूक्तिः प्रभुवंशनामा मान्यास्तु लोके विबुधैः समस्तैः।

[6] प्रभुवंश सर्वश्रेष्ठे पद्यं पद्मविराजिते। गोविन्द सारसोरेमे रमानाथ प्रसादतः॥114॥

[7] प्रभुवंशहस्तलिखित पृष्ठस्य क्रमांक १.आनंदाश्रमसंस्था पुणे।

प्रभुवंशकाव्यस्य सारांशः-

भृगुकुलोत्पन्नस्य परशुरामस्य क्षेत्रे कोकणप्रदेशे श्रीवर्धनग्रामे बल्लाळो नाम विप्रः अवसत्। सः कोकणप्रदेशं विहाय (सुपे-सासवडः)पुण्यपत्तनम् अगच्छत्। तत्र निजगुणैः तेन 'पेशवा'शिवभूपस्य प्रधानमन्त्रिपदं प्राप्तम् आसीत्। तस्मिन् समये कोल्हापुरस्थं शिवभूपस्य साम्राज्यं नष्टप्रायप्रभावं जातम् आसीत्। प्रधानमन्त्री पेशवे क्षात्रस्य धर्मस्य द्विजधर्मस्य च तेज: दर्शयन् शिवराज्याय उपाकरोत्।

बल्लाळनामकस्य प्रधानमन्त्रिणः पुत्रः बाजिरायः "प्रज्ज्वालितो दीपेव प्रदीपात्"। इत्युक्त्यनुसारं सुयोग्य पुत्रः आसीत्। तस्य युवा पुत्रः बाळाजी बाजिरायः (थोरले नानासाहेब) प्रधानमन्त्री अभवत्। बाळाजी बाजिराय: कुशल: शौर्यनिपुण:, राजकर्मप्रवीणः, धर्म-शौर्यप्रतापी भूपः आसीत्। तस्य युवा पुत्रः विश्वासः पानीपतयुद्धे यवनैः मारितः। ततः तस्य विश्वासस्य अनुजः माधवः प्रधानमन्त्री अभवत्। माधवः पराक्रमी, सुयोग्यं सन्नपि युवावस्थायामेव दुर्दैववशात् राजयक्ष्मरोगेण ग्रस्तः अभवत्। युवावस्थायामेव च दिवंगतः। तस्य नासीत् सन्ततिः। माधवस्यानुजः नारायणः अल्पवयीनः अपरिपक्वः आसीत्, तदैव महत्त्वाकांक्षिणा रघुनाथरायेण सत्तालोभात् नारायणस्य हत्या कारिता। यदा नारायणस्य हत्या अभवत् तदा नारायणपत्नी गङ्गा गर्भवती आसीत्। गतधवायाः गर्भवत्याः गङ्गायाः सुरक्षायै अनुभवी अमात्यः नानाफडणवीस नामा तां पुरन्दरगिरौ परमसुरक्षायामस्थापयत्। यतोहि सा एव भाविनः प्रभुवंशप्रधानस्य माता आसीत्। स्वामिनः अमात्यः नाना फडणवीस: राज्यस्य उज्ज्वलाय भाविने उत्कर्षाय, सुयोग्यं भूपं "प्रभुवंशाङ्कु रं" राज्याय देहि इति पुनःपुनः ईश्वरं प्रार्थयत्। अमात्येन गर्भवत्याः गङ्गायाः शरीरस्वास्थ्यस्य मन:स्वास्थ्यस्य च यथोचितः प्रबन्धः कारितः।

यथावकाशं गङ्गा भाविनं भूपं प्रासूत। माताबालकश्च नीरोगिणौ आस्ताम्। अस्य बालकस्य "माधवः" इति नामकरणं कृतम्। अयं बालकः शत्रूणां विशोषणकरः वेदोक्त-कर्मणां प्रवर्तकः, सर्वस्तुत्यश्च भूयाद् इति सवेषामाशीर्वचांसि इच्छा च सम्प्राप्ता आसीत्। माधवस्य जन्मकाले अनेकानि शुभ-चिह्वानि दृष्टानि। यथा

'मेघा नीरमपूरयन् क्षितिरभूत् व्रीहिप्रपूर्णा द्रुमाः।
भूरिस्वादुफलाः खलाश्च विमलाचारा अभूवंस्तदा।।..."[8]

---

[8] प्रभुवंशकाव्य आ पुणे श्लोक१३.

अर्भकस्य माधवस्य संगोपनं कीदृशम् आसीदिति वर्णनमतीव हृदयम्.... "अभ्यज्य तैलरसतः सलिलैः कवोष्णैः संस्नाप्य चेलनिहितः प्रसुवा अथ बालः।.....[9]

श्रद्धावान्अमात्यः बालं माधवं राज्योद्धारकं भूपमिव अकल्पयत्।

तस्य संस्काराणां प्रशिक्षणविषये च सर्वदा प्रायतत। प्रेङ्खास्थितः बालः माधवः एव पराक्रमी भूपः प्रजापालकः शत्रुनाशकः भविष्यतीति प्रजाः आश्वासयन् अमात्यः मन्त्रिगणश्च स्वामिनिष्ठां कर्तव्यनिष्ठां च पालयति स्म।

शयनमङ्गलैः स्नानमङ्गलैः, स्मितलसन्मुखं कामसुन्दरम्।
तिलकशोभितं चारुकुण्डलं, विभुम् अवीवृधन् च उपमातरः।।[10]

विंशतितमस्य श्लोकस्य यद् वृत्तं कविना योजितं तत् काव्यस्य शोभां वर्धयति खलु। बालस्य माधवस्य रूपेण स्मितेन च प्रसन्नाः उपमातरः अतीव प्रेम्णा तस्य संगोपनं कृतवत्यः। प्रसन्नः बाल्यकालः मानसशास्त्रदृष्ट्या अतीव महत्त्वपूर्णः इति विदुषां मतम्। ईदृशः बालकः यौवने आत्मविश्वासयुक्तः मानवतावादी, सङ्कटेष्वनुद्विग्नमनाः कार्ये कुशलः भवतीति प्रायेण अनुभूयते। बालक्रीडायाम् माधवस्य क्रीडाङ्गणं तस्य भावि-पराक्रमस्य द्योतकम् इति कवेः कल्पना। शत्रुपीडितां भूमिम् आश्वासयन्निव माधवः अभ्यास-समये भूमिं हस्तस्पर्शेन सान्त्वयतीति सूचयति। माधवस्य बालभाषा 'अव्यक्तवर्णरमणीया'[11] पदन्यासश्च मोहकः सुखदः इति दृष्ट्वा सर्वं स्त्रीगीतात्मकं आनन्दम् अनुभावयति।

यथासमयं बालः माधवः उपनयनयोग्यः जातः। उपनयनं भारतीयसंस्कृतौ महत्त्वपूर्णः संस्कारः। एषः तु बालस्य पुनर्जन्म एव उच्यते।

"जन्मना जायते शूद्रः संस्काराद् द्विज उच्यते"। मन्त्री एव माधवस्य उपनयनविषये आकुलः आसीत्। सः सकलान् वरिष्ठान् बुधजनान् पृष्ट्वा तेषां विचारं ज्ञात्वा, पुण्यपत्तननिकटे "पर्वतीयोग्यदेशः इति निर्धारितवान्। २१ एप्रिल १७७९ इति तिथौ पर्वतीक्षेत्रे माधवस्योपनयनं सम्पन्नम्। उपनयनात्पूर्वमेव बालस्य माधवस्य मातुच्छत्रमपि विलुप्तम् । अतः अमात्य एव सर्वार्थेन तस्य कृते मातृ-पितृ-भावेन समाचरत्। माधवं विवाहोचितम् मत्वा सः मन्त्री नाना

[9] तत्रैव श्लोकः १४

[10] प्रभुवंश काव्यं श्लोकः २०

[11] अभिज्ञान शाकुन्तलम् अङ्क७

फडणवीस: थत्ते इति उपनामधारिणीं तनयां वधूं निश्चकार। सः मन्त्रिचरं राजानं निमन्त्रणविधौ अयोजयत्। इमम् महोत्सवं यथाशक्यम् उत्तमम् एव करिष्यामि इति प्रतिज्ञा तेन मन्त्रिणा कृता।

हस्तलिखितकाव्यस्य आन्तरिकं साहित्यिकं स्वरूपम्-

अस्य काव्यस्य रीतिः वैदर्भी अस्ति। दीर्घाः सामासिकवाक्यरचनाः न दृश्यन्ते, अलङ्काराः- उपमा, अनुप्रासः, श्लेषः, उत्प्रेक्षादयः सन्ति। शृङ्गाररसपूर्णं तथा च, वीररसपूर्णं काव्यं इदम्। अत्र शब्दालङ्काराः, अर्थालङ्काराश्च दृश्यन्ते। उपमालङ्कारः यथा -
“अथ तद् विलोके चन्द्रोदयेऽबुधिरिवर्ध्यतु सत्प्रहर्षः।“[12] चन्द्रोदयेऽम्बुधिरिव वर्ध्यतु सत्प्रहर्षः। अत: उपमा अलङ्कार: शोभते। **उत्प्रेक्षा अलङ्कारः** यथा

“प्रेङ्खां तनूजसहितां किल चालयन्त्या.. मेने जनैरिति किमेति फणी स लेढुम्।“[13]

अस्मिन् वर्णनं प्रेङ्खां रज्जूं सर्प: आव अनुमन्य वर्णयति। अत: उत्प्रेक्षा अलङ्कारस्य उदा. अस्ति।

शृङ्गाररसस्य उल्लेखः

“ययुः पृष्ठतस्तावरस्यैव रामाशरीरप्रभाधोभत्काम -रामाः।[14]

अस्मिन् पद्ये दृश्यते।

वीररसस्य उल्लेखः उदा.

उच्चैर्बंदिनुतप्रतापउभयप्रांतस्थजांबूनदो....
....नृत्यद्वारनितंम्बिनीनिकरदृग् राजा रराजाधिभूः।[15]

एतादृशं काव्यस्य बाह्यं तथा आन्तरिकं च स्वरूपं वर्तते।

प्रभुवंशकाव्यस्य सांस्कृतिकं योगदानम् -

भारतदेशस्य संस्कृतिः विश्वस्य प्राचीनतमा तथा समृद्धा संस्कृति: मन्यते। कालस्य प्रवाहे अन्यदेशानां संस्कृतयः नष्टा जाता। परन्तु आरम्भतः भारतदेशस्य संस्कृतिः पारंपरिक

---

[12] तत्रैव श्लोकः १

[13] प्र.ह.आ.पु.श्लोक क्र.५८

[14] प्र.ह.आ.पु.श्लोक.क्र.५१

[15] तत्रैव श्लोकः क्र.४९

अस्तित्वेन सह अमरत्वम् अवाप । भारतीय संस्कृते: मौलिका: अंशा: अन्य देशं संस्कृतिभि: स्वीकृता। स्वस्य अस्तित्वम् आरक्षितम्। विश्वे परम्पराभिः प्राप्ता बहवः विचाराः, शिल्पः, वस्तूनि इ.तेषु देशेषु संस्कृतिः मन्यते। संस्कृतिः परिवर्तनशीला भवति । संस्कृते आदर्शवादिता एवं संक्रमणशीलता दृश्यते। विश्वस्य रोचक तथा प्राचीनसंस्कृतिः रूपेण दृश्यते। भिन्न-भिन्नाः धर्माः, परम्पराः,भोजनं, वस्त्राणि संबंधितजनाः अत्र निवसन्ति। अस्माकम् संस्कृतिः विश्वस्य प्राचीनतमा संस्कृतिः एका एव इत्यत्र न विद्यतेऽतः संदेहः।

भारतीय संस्कृतेः वैशिष्ट्यम्-

- **भारतीयसंस्कृतिः** विविधवैशिष्ट्येन युक्ता अस्ति।
- येन वैशिष्ट्येन जीवितं तस्य प्रमुखकारणानि एवं सन्ति।
  - **आध्यात्मिकताः-** अध्यात्मं भारतीयसंस्कृतिः जीवितम् अस्ति।
  - **कर्मवादः-** भारतीयसंस्कृतौ सर्वत्र’ करणीयः कर्म कर्तुं प्रेरणा मन्यते।
    कर्मण्येवाधिकारस्ते मा फलेषु कदाचन...।[16]
  - **विश्वबन्धुत्वम्-**
    - भारतीयसंस्कृतिः संपूर्ण विश्वं कुटुम्बं मन्यते। समस्तं जगत् प्रति कल्याणं सुखं एवं आरोग्यं चिन्तनं करोति।

सर्वे भवन्तु सुखिनः,सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु,मां कश्चिद् दुःखभाग्भवेत्।।

भारतीयसंस्कृतेः सर्वाधिका महत्त्वपूर्णा विशेषता अस्ति। यत्र ऋषिः, महर्षिः, तथा समाजसुधारकः आदि सदा सर्वदा समन्वयवादितायाः बलं दीयते। भारतीयसंस्कृतिः समन्वयवादिता उत्कृष्टा अस्ति। अनेकता एकता उच्यते तथैव अत्र अद्भुतः समन्वयः अस्ति। भोगे त्यागस्य समन्वयः अत्रैव विशेषतः दृश्यते।

- **जातिः एवं वर्णाश्रमाणां व्यवस्थाः** -भारतीयसंस्कृतौ वर्णाश्रमः तथाच, जाति-व्यवस्था श्रमविभाजनदृष्ट्या महत्त्वपूर्णं वर्तते। इयम् व्यवस्था गुणकर्मादिषु आधारिता। जन्मनः आधारेण नास्ति। शतं वर्षाणि जीवनं कल्पितं तस्य विभागः, ब्रह्मचर्यं, गृहस्थः, वानप्रस्थः,

[16] श्रीमद्भगवद्गीता द्वितीयः अध्यायः

सन्यासं इति अनुसारम् विभाजनं कृतम्। इयम् व्यवस्था समाजे सुखः, शान्तिः तथा सन्तोषस्य अभिवृद्धौ सहायकृत् भवति।

○ **संस्कारः** - भारतीयसंस्कृतौ संस्काराणां विशेषतः महत्त्वं दत्तम्। एते संस्काराः समाजे शुद्धिं धार्मिकक्रियां च संबंधिताः सन्ति। एतेषाम् अनुष्ठानस्य मह मानवस्य मूल्यं, आदर्शस्य अनुशासनम् कारयति। दीक्षितं भवेताम्।

गृह्यसूत्रानुसारं हिन्दुधर्मं अनुसृत्य च षोडशसंस्काराः मन्यते।[17]

१) गर्भाधानसंस्कारः २)पुंसवनसंस्कारः, ३)अनवलोभनम् ४)सीमन्तोन्नयनम् ५) जातकर्म ६) नामकरणम्, ७) सूर्यावलोकनम् ८)निष्क्रमणम् ९)अन्नप्राशनम् १०)वर्धापनम् ११)चूडाकर्मः १२)कर्णवेधः १३) यज्ञोपवीतं,उपनयनम् १४)वेदारंभः, अक्षरारंभः१५) विवाह संस्कारः, १६) अन्त्यत्यसंस्कारश्च।

हस्तलिखितकाव्ये संस्कारवर्णनम्-

विवाहसंस्कारः समाजे उत्सवरूपेण आचर्यते। सवाईमाधवरावस्य विवाहस्य वर्णनं श्लोकरूपेणैव रचयिता गोविन्दपण्डितः अकरोत्। अस्माकम् संस्कृतिः च वर्णिता।
विवाहस्य कृते मण्डडपस्य व्यवस्था पर्वतिपरिसरे कृता। पर्वतस्य शिखरे समारंभः आयोजितः आसीत्। सांस्कृतिकदृष्ट्या पर्वतिपरिसरे विशाला, भव्या च व्यवस्था कृता इति इतिहासदृष्ट्या अस्मिन् हस्तलिखिते महत्त्वं वर्तते। पेशवेकालिनः भूपः, मन्त्री दुर्गः, उत्सवस्य महत्त्वं जानन्ति इति कारणेन दुर्गस्य स्वच्छता भवेत्, विवाहसमये समारम्भे जनमनोरञ्जनं कर्तुम् अनेकाः प्रथा, परम्परागतरूढयः, आदानप्रदाने एव हर्षोल्लासः वातावरणे दृश्यन्ते इति महत्त्वपूर्णं योगदानम् अस्ति। विवाहस्य वेलायां मन्दिराणां जीर्णोद्धारः भवेत्, नूतनमन्दिरस्य निर्माणम् अकरोत्। महाराजस्य शासनकाले श्रद्धास्थानानां कारणेन तथाच, पेशवेकालखण्डे अनुष्ठानं, यज्ञं पूजा इति धार्मिकस्थलेषु भवेत् इति कारणेन दुर्गस्य समीपे मन्दिरस्य निर्माणं क्रियते।[18]

उपसंहारः-

अस्मिन् शोधपत्रे पेशवासवाईमाधवस्य वर्णनम्, नाना फडणवीस मन्त्रिण: विवाहस्य आयोजनं कथम् अकरोत्। विवाहसमये परम्परागतरूढि: आदानप्रदानपद्धति: एव हर्षोल्लासितवातावरणं यादृशं दृश्यते स्म तदत्र वर्णितम् अस्ति। तथा विवाहस्य वेलायां नैका:

---

[17] आश्वलायन गृह्यसूत्रम्,वैदिक धर्म ग्रंथ परिचय,सतिश आर्य,

[18] रणजित देसाई, स्वामी , मेहता पब्लिशिंग हाऊस,आ,२०१२.

भोजनविधा: पदार्था: आसन् इत्यादिकम् वर्णनं लभ्यते। सचित्रं इव विवाहवर्णन-चित्राणि कविना पद्ये लिखितानि। कवेः काव्यशैली सरला स्वाभाविकी च वर्तते। इति प्रभुवंशकाव्यस्य सांस्कृतिक: परिचय-संक्षेप: अत्र उपवर्णित:।

□□□

अ) मूलहस्तलिखितग्रन्थप्रति-संक्षेपसूचिः

१. प्रभुवंशकाव्यं हस्तलिखितम्,आनंदाश्रमसंस्था पुणे ६८४/३१,प्रत १.
२. प्रभुवंशकाव्यं हस्तलिखितं मुंबई विद्यापीठम्,२१९५(विवाहसर्गः) प्रत२.
३. प्रभुवंशकाव्य टङ्कमुद्रित प्रत भारतइतिहाससंशोधनमंडलम्, पुणे (अ९३२,१२/६/५१)दि.स.४१.

आ) सहायकसन्दर्भग्रन्थसूचिः

१. ओक प्रमोदः पेशवे घराण्याचा इतिहास,कॉन्टिनेन्टलप्रकाशनम्, आवृतिः २००१.
२. रानडे उषा, प्रभुवंश एक अध्ययन, शोधपत्रम्, त्रैमासिक खंड १७
३. कुलकर्णी,अ रा पुण्याचे पेशवे, आवृत्ती मार्च १९९९.
४. कुलकर्णी,अ रा पेशव्यांची बखर,पृष्ठ क्रमांक ४६९.
५. खरे,वा.वा. ऐतिहासिकं लेखसंग्रह: , विभाग:-१ त:१५.
६. दीक्षित,नी.सी, छत्रपती आणि पेशवे,प्रकाशन पिंपळापुरे ॲण्ड क पब्लिशर्स,प्रथम: आवृत्ती जुन२०१४.
७. देसाई रणजित, स्वामी, मेहता पब्लिशिंग हाऊस, पुणे.आवृत्ती २०१२.
८. हडप य. प. भारतीय संस्कृती, लिमये प्रकाशनम्, आ.मार्च१९९०.
९. कुलकर्णी अ, देशपांडे प्र, मराठ्यांचा इतिहास भाग १,स्नेहवर्धन प्रकाशनम् १८०७.
१०. कोलारकर शं.गो, मराठ्यांचा इतिहास, श्रीमंगेश प्रकाशनम् , नागपूरम्,१९०८.
११. सतिश आर्य आश्वलायन गृह्यसूत्रम्, वैदिक धर्म ग्रंथ परिचयः।
१२. साक्रीकर विश्वासः, उपनयन संस्कारः आवृति २०११, राष्ट्र सेविका समिती पुरोहित शाखा-नाशिकम्।
१३. राजवाडे, वि. का.- मराठ्यांच्या इतिहासाची साधने,खंड१,२,४,५...
१४. वाड,रा. ब.ग.चि. सवाई माधवराव पेशवे रोजनिशी, आ.स.१९०८.
१५. सहस्रबुद्धे, पु. ग.- महाराष्ट्र संस्कृतिः,आवृति १९७९.

समश्लोकीगुरुचरित्रग्रन्थानुसारं कर्माचरणम्

सौरभ जोशी
डॉ. जयवन्त चौधरी

प्रस्तावना

परमपूज्याः भगवत्पादाः आद्यशङ्कराचार्याः बौद्धकालात्परं नवमे शतके वैदिकधर्मस्य पुनः स्थापनामकुर्वन्। किन्तु तदनन्तरमपि धर्मसंस्कृत्योः सुव्यवस्थिततया प्रतिष्ठापनार्थं भगवान् श्रीदत्तात्रेयः श्रीनृसिंहसरस्वतिनाम्ना भूम्यामाविर्बभूव। **अवतीर्णोऽस्म्य"हं धर्मत्राणकारणतो भुवि''।**[1] अर्थात् शोकाकुलायाः मातुः सान्त्वनार्थमहमवतीर्णः इति श्रीनृसिंहसरस्वतिस्वामिमहाराजः समश्लोकी गुरुचरित्रग्रन्थे स्पष्टं वदति इति। भगवतः दत्तात्रेयस्य अवतारात्परं पञ्चशतवर्षेषु वैदिकधर्मसंस्कृत्योः अतिभयङ्करमुघलसत्तायाः एवञ्च भारतवर्षे एकाधिकारं प्रस्थापितवतः तादृशस्य आङ्ग्लप्रशासनस्य च प्रचण्डाः आघाताः अभवन्। अस्मिन् काले धर्माचरणस्य संरक्षणाय संन्यासधर्मपालनस्य आदर्शसंवर्धनाय च दत्तसंप्रदायस्य परमहंसपरिव्राजकाचार्य-श्रीवासुदेवानन्दसरस्वतीमहाराजेन **समश्लोकी** गुरुचरित्रग्रन्थस्य रचना कृता| वस्तुतः अयं ग्रन्थः अनुवादितः वर्तते| मूलग्रन्थः गुरुचरित्रनाम्ना मराठीभाषायां सरस्वती गङ्गाधरमहाशयेन लिखितः| परमहंसपरिव्राजकाचार्यश्रीवासुदेवानन्दसरस्वती -महाराजस्य कार्यं वैदिकधर्मस्य रक्षा तथा वैदिकनियमानि प्रस्थापितुमेव विद्यते। इदं धर्मसंस्थापनार्थाय संभवामि युगे युगे।[2] इति भगवतः श्रीकृष्णस्य उक्त्यनुसारमेव वर्तते। प्रतिकूलपरिस्थित्यां वैदिकधर्मानुरूपं कर्माचरणं स्वतः कठोरतया पालितम्। तथैव स्वकीये साहित्ये अपि तदेव दर्शितम्। अत एव समाजे तद् बीजं गाढतया रोपयितुं सः समर्थः अभूत्। एवं प्रकारेणैव वर्णाश्रमोचितं कर्माचरणं स्वामिमहाराजेन समश्लोकिगुरुचरित्रेऽपि वर्णितम् अस्ति।

1 स. गु.८९.११
2 भ.गी. 4

विषयोपस्थापना –

नित्यकर्माणि

वैदिकधर्मार्थं पोषकाणां कर्मणः चत्वारः प्रकाराः प्रोक्ताः। ते च एवम् - नित्यनैमित्तिककाम्यप्रायश्चित्तादयः । अनन्तव्रतं, प्रदोषं, सोमवारव्रतमित्यादीनां काम्यव्रतानां प्रसङ्गोपेतं वर्णनं यद्यपि ग्रन्थे विद्यमानं वर्तते, तथापि स्वामिमहाराजः विशेषत्वेन काम्यकर्मान् न मनुते । काम्यातिरिक्तानामितरकर्मणां विस्तृतं वर्णनमत्र प्राप्तुं शक्यते । आह्निकनिरूपणस्य द्वयोः अध्याययोः ब्रह्मकर्मणः स्वरूपेण नित्यनैमित्तिकयोः कर्मणोः विस्तृतं वर्णनमस्मिन् ग्रन्थे उपलभ्यते।

नित्यकर्मसु स्नानं, सन्ध्यावन्दनं, ब्रह्मयज्ञः, देवपूजा, वैश्वदेवः इत्यादीनां समावेशः भवति। ब्राह्ममुहूर्ते उत्थाय सद्भावेन गुरूणां स्मरणं कुर्यात् । ब्रह्माविष्णुमहेश इति त्रिमूर्तिं सलक्षणं चिन्तयेत्। मलमूत्रं त्यक्त्वा वर्णाश्रमानुसारेण शुद्धिमाचरेत्।[3] दन्तधावनाचमनाभ्यां परं प्रातःस्नानस्य किं फलमिति रहस्यं उद्घाट्य उच्यते -

प्रातः स्नानं ततः कुर्यादनेन सर्व प्रसिद्ध्यति । प्रातःस्नानान्नृणां तेजोबलायुर्वर्धनं मतम् ।।
प्रज्ञापि वर्धते नश्येदुःस्वप्नं सर्वदेवताः। वशा भवन्ति सौभाग्यसुखपुष्टिमुदो लभेत् ।।[4]

अर्थात् यः मनुष्यः प्रातः स्नात्वा कार्याणि करोति तस्य सर्वाणि अपि कार्याणि फ़लन्ति देवाश्च तुष्टाः भवन्ति, दुःस्वप्नं नश्यति प्रज्ञापि वर्धते इत्यादि |

गार्हस्थ्येन प्रातःकाले मध्याह्ने च, यतिभिः, व्रतिभिः, वानप्रस्थजनैश्च त्रिकाले, ब्रह्मचारिभिः स्त्रीभिश्च प्रातःकाले एकवारमेव स्नानं कर्तव्यम् । एतदनन्तरं भस्मगोपिचन्दनादि धृत्वा सन्ध्यावन्दनमाचरेत् । सन्ध्यावन्दनस्य विशिष्टः कालः उल्लिखितः अस्ति[5]। एवञ्च स्थानपरत्वे सन्ध्यावन्दनस्य फलमपि प्रतिपदितम् अस्ति। तद् यथा

गृहे त्वेकगुणं पुण्यं बहिर्दशगुणं स्मृतम् । नद्यां शतगुणं तीर्थे पुष्करादौ सहस्रकम् ।।
अमितं सुरनद्याञ्च सन्ध्यावन्दनजं फलम् । वह्निः सन्ध्यावन्दनेन नश्येत्तद्वज्जपस्य हि ।

---

3 स. गु. 36.4-8

4 स. गु.३६/५५,५६,५७

5 स. गु. ३६/२११-२१६

गृह एकगुणं नद्यां त्रिघ्नं दशगुणं वने ।। गोष्ठे च वह्निशालायां शतनं तीर्थदेवयोः ।।[6]

अर्थात् महाराजेन सन्ध्यावन्दनस्य फलं गृहे तु एकगुणं बहिर्दशगुणमुक्तम् , तथैव नद्यां शतगुणं तीर्थे पुष्करादौ सहस्रकं फ़लं लभ्यते इति उक्तम्|

परमहंसपरिव्राजकाचार्यश्रीवासुदेवानन्दसरस्वतीमहाराजः षट्त्रिंशत्तमे अध्याये वदति सन्ध्यायाः परमौपासनमाचरेत्। विवाहात्परं प्रातःकाले सायङ्काले च नित्यनैमित्तिकं यजेत्। ब्रह्मयज्ञं तर्पणञ्चापि प्रोक्तम्। पादप्रक्षालनं विना स्नानस्य, तिलेन विना तर्पणस्य, दक्षिणां विना श्राद्धस्य निष्फलता उच्यते। ब्राह्मणार्थं यथा सन्ध्या तद्वदेव भक्त्या त्रिकाले पूजा अपि करणीया इत्युक्तम्[7] ।

देवपूजाप्रकारवर्णने स्वामिमहाराजः कथयति -

पूजयेद्यज्ञपुरुषं विज्ञाता बुद्धिमान्नरः| स्वर्गापवर्गदा यज्ञपूजा मुख्या बुधैः स्मृता ||
अथवा पूजयेद्धेनुं ब्राह्मणं च विशेषतः | त्रिमूर्तयो हि तुष्यन्ति भक्त्या श्रीगुरुपूजनात् ||
त्रिमूर्तिर्गुरुरेवेति वक्ति श्रुतिरपि स्मृतिः| गुर्वचनादभीष्टाप्तिः पुरुषार्थाप्तिरेव च ||
स्थिरान्तःकरणं नैव कलौ प्राप्ते नृणामतः| मनःस्थैर्याय सूपायः कृतः शार्ङ्गधरेण तु ||
प्रकाशितं हृषीकेशा शालग्रामार्चनं परम् | सचक्रं शालग्रामाम्बुप्राशनात्पातकक्षयः ||
अधिगम्य गुरोराज्ञां प्रतिमां पूजयेद्विजः| वेदमन्त्रैविधानेन भक्त्याऽकपटया धिया ||[8]

अर्थात् यज्ञपूजा स्वर्गापवर्गस्य दायिनी भवति। एतदतिरिक्तं धेनुपूजनं ब्राह्मणपूजनञ्च कर्तव्यमित्युक्तम् । भक्त्या गुरुपूजनं विधीयते चेत् त्रिमूर्तेः सन्तोषमवाप्यते । द्विजैः गुर्वाज्ञया प्रतिमापूजनं कर्तव्यम्। तद् विधियुतं, भक्त्या, निष्कपटबुद्ध्या च भवेत् । देवपूजनेन भुक्तिः मुक्तिश्च लभ्येते।

परमहंसपरिव्राजकाचार्यश्रीवासुदेवानन्दसरस्वतीमहाराजः सप्तत्रिंशत्तमे अध्याये वदति-

यो वैश्वदेवसमये सम्प्राप्तो ब्राह्मणोत्तमः | स च पूज्यः प्रयत्नेन वर्णानां ब्राह्मणो गुरुः ||
यो वैश्वदेवसमये पूजयेद्ब्राह्मणातिथिम् | तेन सर्वेऽर्चिता देवास्तुष्यन्त्यग्निमुखाः सुराः ||[9]

---

6 स. गु. ३६/२१६ -२१९
7 स. गु. ३६/२२२-२२८
8 स. गु. ३७/२१-२६
9 स.गु. ३७/९६,९७

अर्थात् यदि वैश्वदेवसमये कश्चित् अतिथिः गृहं प्राप्नोति चेत् तस्मै भिक्षां दद्यात्। तेन वैश्वदेवस्य फलं प्राप्यते। आश्रमानुसारं भोजनसमये ग्रासग्रहणस्यापि निश्चितः नियमः भवति । यथा -

संन्यासिनो भोजने तु ग्रासा अष्टौ प्रकीर्तिताः।
द्वात्रिंशत्तु गृहस्थस्य वानप्रस्थश्च षोडशः।
एषां मध्ये यथेष्टं तु ग्रासाः स्युर्ब्रह्मचारिणः।।[10]

एवं प्रकारेण महर्षिणा नित्यकर्माणि उक्तानि | तेषु एव दानं, शिवपूजा, व्रतं, होमः, जपं, ब्राह्मणतर्पणादीनामपि महत्त्वमुक्तम् |

नैमित्तिककर्माणि

व्रतम्, उत्सवः, संस्कारः, जननशान्तिः, श्राद्धञ्च इत्यादीनां सर्वेषां समावेशः नैमित्तिककर्मसु भवति । प्रदोषव्रतम्, सोमवारव्रतम्, अनन्तव्रतञ्च इत्यादीनां सर्वेषां व्रतानाम् अन्तर्भावः स्वामिमहाराजः समश्लोकिगुरुचरित्रे नैमित्तिककर्मेषु एव करोति । सोमवारव्रतस्य महत्वं निरुपयन् वदति –

सोमवारव्रतं त्वेवं कन्यके त्वं समाचर |
क्लेशा नश्यन्ति दुरितं भयं चाप्तं हरो हरेत् |[11]

एवमेव त्रिचत्वारिंशेऽध्याये अनन्तव्रतस्य फलं वदति –

युधिष्ठिरः पाण्डुपुत्रः कृत्वाऽनन्तव्रतं महत् | गतं राज्यमपि प्राप व्रतमीदृगनुत्तमम् ||[12]

स्वामिपादाः वदन्ति संस्कारेभ्यः मानवः सुसंस्कृतः, नीतिसम्पन्नः, चारित्र्यसम्पन्नश्च भवति । एवं प्रकारेण नैमित्तिककर्माणां महत्त्वप्रतिपादनं कृत्वा सामान्यजनैरऽपि तेषामाचरणस्याग्रहं करोति । अनेन कर्मणा एव मानवाः उत्तमां गतिं प्राप्नुवन्ति।

---

10 स.गु. ३७/१५१,१५२
11 स.गु. ३५/१३५
12 स.गु. ४२ /३

प्रायश्चित्तकर्माणि

कर्माचरणस्य लोपेन, कर्माचरणे प्रमादैश्च ये दोषाः उत्पद्यन्ते तेभ्यः मुक्तिप्राप्तिः इति प्रायश्चित्तकर्मणां प्रयोजनं वर्तते । श्रीस्वामिमहाराजः समश्लोकेः अष्टाविंशे अध्याये कर्मविपाकस्य निरूपणे त्रिविक्रममुपदिशति-

गुरुस्त्रिविक्रमं प्राह प्रायश्चित्तविधिं शृणु | पश्चात्तापो भवेद्यस्य तस्य पापं प्रणश्यति ||
महापापं यदि कृतं तदन्तःकरणे स्थितम् | तस्य कर्मविपाकोक्तं प्रायश्चित्तमिदं शृणु ||
अज्ञानकृतपापं तु पश्चात्तापेन नश्यति | गुरुसेवापरस्याचं निवारयति सद्गुरुः ||[13]

अर्थात् यदि महापापमाचरितं स्यात् किन्तु अन्तःकरणे तस्य पीडा अनुभूयते तर्हि कर्मविपाकानुसारेण प्रायश्चित्तमुक्तमस्ति । अज्ञात्वा घटितं पापं पश्चात्तापेन नष्टतामायाति। ब्राह्मणैः सौम्यपातकनाशाय सुवर्णदानम्, तीर्थयात्रागमनं च अनुष्ठेयमिति उपायाः अपि उक्ताः । स्त्रीपुत्रेषु एकेनापि यदि पापमाचरितं तर्हि तद् द्वावपि बाधते । अतः प्रायश्चित्तविधानं उभाभ्यामाचरणीयं भवति[14]।

प्रायश्चित्तकर्मसु चान्द्रायणम्, कृच्छः, अर्धकृच्छः, पादकृच्छः, इत्यादीनां नैकानां प्रायश्चित्तानामन्तर्भावः प्रायश्चित्तकर्मसु भवति। स्वशाखावेदपठनेन कृच्छसिद्धिर्भवति । एवञ्च दशसहस्रजपेन गायत्रकृच्छं भवति । कृच्छातिकृच्छ्रचान्द्रायणानामनुष्ठानेन पापलयमवाप्नोति इति उक्तम्[15]। एवमेव उपोषणेन, समुद्रस्नानेन, तीर्थयात्रया, अश्वत्थवृक्षप्रदक्षिणया च महापातकेभ्यः मुक्तिरवाप्यते ।

परमहंसपरिव्राजकाचार्यश्रीवासुदेवानन्दसरस्वतीमहाराजः अष्टाविंशतितमे अध्याये वदति पश्चात्तापेन ब्राह्मणस्य मनः निष्कल्मषः भवति । तथैव तस्य सर्वेऽपि दोषाः अनुतापाग्निमध्ये भस्मीभूताः भवन्ति[16] ।

निष्कर्षः

ईशावास्योपनिषदि उच्यते –

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतँ समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे||[17]

13 स.गु. २८/७९-८१
14 स.गु. २८/८७-९०
15 स.गु. २८/८६
16 . स.गु. २८/१०१-१०३

अर्थात् मनुष्यः कर्माणि कुर्वन् शतं वर्षाणि यावत् जीवेत् | वस्तुतः मनुष्यस्य जीवने कर्मणामतीव महत्त्वं वर्तते | मनुष्यः कर्माचरणं विना एकं क्षणमपि स्थातुं न शक्नोति | मनुष्यः किमपि कार्यं करोति तदा एव सः कर्म करोति इति नास्ति वस्तुतः मनुष्यः यत् चिन्तयति, यत् वदति तत् सर्वमपि कर्माचरणमेव | परन्तु कर्म नाम किम् ? कर्म कतिधा ? कीदृशानि कर्माणि करणीयानि ? कस्य कर्मणः किं फलम् ? कीदृशस्य अकर्मणः किं फलम् ? अकर्म आचरितं चेत् तस्य किं प्रायश्चित्तम् ? एतादृशेषु विषयेषु अद्यतन समाजः अनभिज्ञः। अद्यतनीयमनुष्यः किं करणीयमिति न जानाति अत एव सर्वत्रापि दुखःस्य साम्राज्यं वर्तते। समश्लोकीगुरुचरित्रम् अद्यतनीयसमाजस्य कृते दर्पण इव वर्तते। अस्य ग्रन्थस्याध्ययनेन प्रत्येकं मनुष्यः कर्मणः महत्त्वं ज्ञात्वा, कीदृशानि कर्माणि करणीयानि कीदृशानि नैव करणीयानि इति ज्ञानमवाप्य स्वतः अपि सुखं प्राप्तुं शक्नोति अन्यानपि प्रापयितुं शक्नोति।

□□□

17 ई. उ.२

शरद्रात्रिव्याख्यायां करणकारकसूत्राणां समीक्षणम्

कविता जोशी

डॉ.शिवरामभट्टः

भाषायाः अङ्ग-प्रत्यङ्गस्य विश्लेषणं यस्मिन् क्रियते तत् व्याकरणम्। कापि भाषा यदि वक्तुं ज्ञातुं च इष्यते चेत् तस्याः भाषायाः व्याकरणस्य अध्ययनमानुषाङ्गिकम्। सुविदितमेतत् यत् व्याकरणं नाम वेदाङ्गस्य प्रधानभूतं मुख्याख्यमङ्गमिति। 'व्याक्रियन्ते शब्दाः अनेन इति व्याकरणम्।' शब्दानुशासनमिति व्याकरणस्यान्वर्थं नाम। पाणिनिव्याकरणस्य मूलं भवति 'अष्टाध्यायी'। पाणिनीयव्याकरणे वैदिकलौकिकसाहित्ययोः विवेचनात्मकम् अध्ययनं कृतम्। अष्टाध्यायीग्रन्थस्य बहवः व्याख्याग्रन्थाः सन्ति । 'वैयाकरणसिद्धान्तकौमुदी' इति श्रीभट्टोजीदीक्षितमहोदयस्य व्याख्याग्रन्थः प्रसिद्धः। एतस्य ग्रन्थस्यापि बहवः टीकाग्रन्थाः सन्ति। यथा तत्त्वबोधिनीव्याख्या, प्रौढमनोरमा, तत्त्वदीपिका, लघुशब्देन्दुशेखर इत्यादयः। केवलं संस्कृतभाषायां टीकाग्रन्थाः सन्ति इति न, अपि तु भिन्नायां भाषायामपि टीकाग्रन्थाः वर्तन्ते। यथा 'शरद्रात्रिः' इति टीकाग्रन्थः। श्रीबेल्लम्कोण्डरामरायकवीमहोदयः 'शरद्रात्रिटीकायाः रचयिता। वस्तुतः एषः ग्रन्थकारः तेलुगुग्रन्थकारः। श्रीबेल्लम्कोण्डरामरायकवीन्द्रमहाभागः तेलुगुभाषायाः विद्वान, अद्वैतवादी ग्रन्थकारः अस्ति। महोदयः प्रायशः अष्टचत्वारिंशदधिकशतं (१४८) ग्रन्थान् अलिखत्। सम्प्रति पञ्चचत्वारिंशत् (४५) ग्रन्थाः उपलब्धाः। संस्कृतविद्वत्सु अद्वैतसिद्धान्तस्य नूतनं तत्त्वज्ञानं स्थापितवन्तः एते ग्रन्थकाराः, अपरः 'आदिशङ्करः' इति नाम्ना प्रसिद्धाः।[१] 'शरद्रात्रि'ग्रन्थः अपि तेलुगुलिप्यां वर्तते। एतस्य ग्रन्थस्य संशोधनं देवनागरीलिप्यां कृतमस्ति डॉ. कम्भपाटि सीतारामाञ्जनेयुलुमहोदयेन। शरद्रात्रिः बालमनोरमा इति च व्याख्यां स्वीकृत्य मम साम्प्रतिकम् अध्ययनं जायमानमस्ति।

कारकसूत्राणि तु बहूनि सन्ति। अतः अत्र करणकारकसूत्राणाम् अध्ययनं स्वीकरोमि। करणकारकस्य मुख्यतः नवसूत्राणि सन्ति।'साधकतमं करणम्', 'कर्तृकरणयोस्तृतीया', 'दिवः कर्मः च', 'अपवर्गे तृतीया', 'सहयुक्तेऽप्रधाने', 'येनाङ्गविकारः', 'इत्थंभूतलक्षणे', 'संज्ञोऽन्यतरस्यां कर्मणि', तथा च 'हेतौ' इति।

करणकारकमित्युक्ते किम्? इत्यस्य उत्तरं ‘साधकतमं करणम्’[1] इति सूत्रे वर्तते। क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यात्। अत्र ग्रन्थकारेण वृत्त्यनुसारं विवरणं न कृतम्। किन्तु ‘गङ्गायां घोष:’ उदाहरणस्य विवरणं सम्यकतया कृतमस्ति। ग्रन्थकारेण उच्यते यत् ‘गङ्गायां घोष:’- वसतीति शेष:।[2] वसधातूपात्तव्यापाराश्रयत्वेन विवक्षितो घोष: कर्ता- तस्य च कर्तृत्वस्य वसतीति तिङा अभिहितत्वात्। घोषाधारत्वेन गङ्गात्र न मुख्यमुपकारकं तीरस्यैव घोषाधारत्वात्। ‘गङ्गायां घोष:’ इत्यत्र अधिकरणसंज्ञा किमर्थं न? इति चिन्तनं ग्रन्थकारेण कृतम् । उच्यते – “गौणमुख्ययोर्मुख्ये कार्यसंप्रत्यय:” इति न्यायेन तिलेषु तैलं, क्षीरे सर्पिरित्यादौ यत्र सर्पिस्तैलादेर्मुख्य: य आधार: तिलादि: तस्यैव आधारोधिकरण-मित्यधिकरणसंज्ञा सिद्ध्यति । न तु प्रकृते गङ्गायां घोषाधारत्वस्य उपचरितत्वेन गौणत्वात्। सूत्रे तमब्ग्रहणं किमर्थम्? भणति कारकसंज्ञाविशेषाणां करणादिसंज्ञानाम्मध्ये करणसंज्ञायामेव गौणमुख्यन्याय प्रवृत्तिर्नेतरत्रेति ज्ञापनार्थं तमब्ग्रहणम्। तेन च तमब्ग्रहणेन तथा ज्ञापितत्वादधिकरणसंज्ञायां न गौणमुख्यन्यायप्रवृत्ति:। अत एव ‘गङ्गायां घोष:’ इत्यत्र गौणाधारस्यापि ‘गङ्गाया: अधिकरणसंज्ञावत्त्वेन सप्तमी सिद्ध्यतीति यावत्। एतादृशं विवरणं ‘साधकतमं करणम्’ सूत्रस्य वर्तते। अनन्तरम् ‘अपवर्गे तृतीया’ सूत्रस्य विवरणमस्ति। एतस्मिन् सूत्रे अपि वृत्त्यनुसारेण चर्चा नास्ति। केवलं ‘ मासमधीतो नायात:’ - अनुवाक इति कर्तृपदं नायात इत्यनेन अध्ययनक्रियाफलभूतविद्यालाभाभाव: प्रोक्त इति अपवर्गाभावन्मासमित्यत्र कालाध्वनोरिति द्वितीयैव न त्वपवर्ग इति तृतीयेति भाव: ।’ इति उक्तम्। अर्थात् फलप्राप्ति: भवति चेत् एतेन सूत्रेण तृतीया भवति अन्यथा द्वितीया, यथा मासमधीतो नायात:। अग्रिमसूत्रमस्ति ‘येनाङ्गविकार:’। एतस्मिन् सूत्रे वृत्त्या: विवरणं ग्रन्थकारेण कृतम्। उच्यते- योनाङ्गविकार: अङ्गमस्यास्तीत्यङ्ग: । तस्य विकार: अङ्गविकार: । येन लक्ष्यते, अङ्गिनो विकार: अङ्गविकाराधीन इति। अङ्गि-विकारलक्षकमङ्गं विकार्येव भवितुं युक्तम्। तस्मात् येनेत्यस्य विकृतेन अङ्गेन इत्यर्थ:। पुरुषसंबन्धिकाणत्वविशिष्टमक्षीत्यङ्गविकार: एवात्र प्राधान्येन विवक्षित: ।

‘इत्थंभूतलक्षणे’[3] इति सूत्रे इत्थंभूतेति लुप्तषष्ठीकं पदम् इति उक्तम् । ‘इत्थंभूत’ शब्दस्य अर्थ: क:? उच्यते ‘इत्थंभूत’ इत्यस्य कञ्चित्प्रकारं प्राप्त इत्यर्थ:। यथा जटाभिस्तापस:

---

1 अष्टा. १.४.४२

2 शरद्रात्रि: पृ. क्र. २१६

3 अष्टा. २.३.२१

केशा एव निरन्तराभिषवणेन कञ्चित्प्रकारं प्राप्य जटात्वेन कथ्यन्ते इति जटा इत्थंभूता: तासां तापसस्य च लक्ष्यलक्षणभाव: संबन्ध:। तदेव जटाज्ञाप्यतापसत्त्वविशिष्ट इति दर्शयति। एतेन प्रकारेण ‘इत्थंभूतलक्षणे’ सूत्रस्य विवरणं दत्तम्।

